# श्री रुद्रं लघुन्यासम्

ॐ अथात्मानगं शिवात्मानग् श्री रुद्ररूपं ध्यायेत् ॥

शुद्धस्फटिक सङ्काशं त्रिनेत्रं पञ्च वक्त्रकम् ।
गङ्गाधरं दशभुजं सर्वाभरण भूषितम् ॥

नीलग्रीवं शशाङ्काङ्कं नाग यज्ञोप वीतिनम् ।
व्याघ्र चर्मोत्तरीयं च वरेण्यमभय प्रदम् ॥

कमण्डल्वक्ष सूत्राणां धारिणं शूलपाणिनम् ।
ज्वलन्तं पिङ्गलजटा शिखा मुद्द्योत धारिणम् ॥

वृष स्कन्ध समारूढम् उमा देहार्थ धारिणम् ।
अमृतेनाप्लुतं शान्तं दिव्यभोग समन्वितम् ॥

दिग्देवता समायुक्तं सुरासुर नमस्कृतम् ।
नित्यं च शाश्वतं शुद्धं ध्रुव-मक्षर-मव्ययम् ॥

सर्व व्यापिन-मीशानं रुद्रं वै विश्वरूपिणम् ।
एवं ध्यात्वा द्विजः सम्यक् ततो यजनमारभेत् ॥

अथातो रुद्र स्नानार्चनाभिषेक विधिं व्याख्यास्यामः । आदित एव तीर्थे स्नात्वा उदेत्य शुचिः प्रयतो ब्रह्मचारी शुक्लवासा देवाभिमुखः स्थित्वा

आत्मनि देवताः स्थापयेत् ॥

प्रजनने ब्रह्मा तिष्ठतु । पादयो-र्विष्णुस्तिष्ठतु । हस्तयो-र्हरस्तिष्ठतु । बाह्वोरिन्द्रस्तिष्टतु । जठरेऽग्निस्तिष्ठतु । हृदये शिवस्तिष्ठतु । कण्ठे वसवस्तिष्ठन्तु । वक्त्रे सरस्वती तिष्ठतु । नासिकयो-र्वायुस्तिष्ठतु । नयनयोश्चन्द्रादित्यौ तिष्टेताम् । कर्णयोरश्विनौ तिष्टेताम् । ललाटे रुद्रास्तिष्ठन्तु । मूर्ध्न्यादित्यास्तिष्ठन्तु । शिरसि महादेवस्तिष्ठतु । शिखायां वामदेवास्तिष्ठतु । पृष्ठे पिनाकी तिष्ठतु । पुरतः शूली तिष्ठतु । पार्श्वयोः शिवाशङ्करौ तिष्ठेताम् । सर्वतो वायुस्तिष्ठतु । ततो बहिः सर्वतोऽग्नि-र्ज्वालामाला-परिवृतस्तिष्ठतु । सर्वेष्वङ्गेषु सर्वा देवता यथास्थानं तिष्ठन्तु । माग्ं रक्षन्तु ।

अ॒ग्निर्मे॑ वा॒चि श्रि॒तः । वाग्धृद॑ये । हृद॑यं॒ मयि॑ । अ॒हम॒मृते᳚ । अ॒मृतं॒ ब्रह्म॑णि ।
वा॒युर्मे᳚ प्रा॒णे श्रि॒तः । प्रा॒णो हृद॑ये । हृद॑यं॒ मयि॑ । अ॒हम॒मृते᳚ । अ॒मृतं॒ ब्रह्म॑णि । सूर्यो॑ मे॒ चक्षुषि श्रि॒तः । चक्षु॒र्हृद॑ये । हृद॑यं॒ मयि॑ । अ॒हम॒मृते᳚ । अ॒मृतं॒ ब्रह्म॑णि । च॒न्द्रमा॑ मे॒ मन॑सि श्रि॒तः । मनो॒ हृद॑ये । हृद॑यं॒ मयि॑ । अ॒हम॒मृते᳚ । अ॒मृतं॒ ब्रह्म॑णि । दिशो॑ मे॒ श्रोत्रे᳚ श्रि॒ताः । श्रोत्र॒ग्ं॒ हृद॑ये । हृद॑यं॒ मयि॑ । अ॒हम॒मृते᳚ । अ॒मृतं॒ ब्रह्म॑णि । आपो॑ मे॒ रेत॑सि श्रि॒ताः । रेतो॒ हृद॑ये । हृद॑यं॒ मयि॑ । अ॒हम॒मृते᳚ । अ॒मृतं॒ ब्रह्म॑णि । पृ॒थि॒वी मे॒ शरी॑रे श्रि॒ताः । शरी॑र॒ग्ं॒ हृद॑ये । हृद॑यं॒ मयि॑ । अ॒हम॒मृते᳚ । अ॒मृतं॒ ब्रह्म॑णि । ओ॒ष॒धि॒ व॒न॒स्पत॑यो मे॒ लोम॑सु श्रि॒ताः । लोमा॑नि॒ हृद॑ये । हृद॑यं॒ मयि॑ । अ॒हम॒मृते᳚ । अ॒मृतं॒ ब्रह्म॑णि । इन्द्रो॑ मे॒ बले॑ श्रि॒तः । बल॒ग्ं॒ हृद॑ये । हृद॑यं॒ मयि॑ । अ॒हम॒मृते᳚ । अ॒मृतं॒ ब्रह्म॑णि । प॒र्जन्यो॑ मे॒ मू॒र्ध्नि श्रि॒तः । मू॒र्धा हृद॑ये । हृद॑यं॒ मयि॑ । अ॒हम॒मृते᳚ । अ॒मृतं॒

ब्रह्मणि । ईशानो मे मन्यौ श्रितः । मन्युर्हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । आत्मा म आत्मनि श्रितः । आत्मा हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । पुनर्म आत्मा पुनरायु रागात् । पुनः प्राणः पुनराकूतमागात् । वैश्वानरो रश्मिभिर्-वावृधानः । अन्तस्तिष्ठत्वमृतस्य गोपाः ॥

अस्य श्री रुद्राध्याय प्रश्न महामन्त्रस्य अघोर ऋषिः, अनुष्टुप् चन्दः, सङ्कर्षण मूर्ति स्वरूपो योऽसावादित्यः परमपुरुषः स एष रुद्रो देवता । नमः शिवायेति बीजम् । शिवतरायेति शक्तिः । महादेवायेति कीलकम् । श्री साम्ब सदाशिव प्रसाद सिद्ध्यर्थे जपे विनियोगः ॥

ॐ अग्निहोत्रात्मने अङ्गुष्ठाभ्यां नमः । दर्शपूर्ण मासात्मने तर्जनीभ्यां नमः । चातुर्-मास्यात्मने मध्यमाभ्यां नमः । निरूढ पशुबन्धात्मने अनामिकाभ्यां नमः । ज्योतिष्टोमात्मने कनिष्ठिकाभ्यां नमः । सर्वक्रत्वात्मने करतल करपृष्ठाभ्यां नमः ॥

अग्निहोत्रात्मने हृदयाय नमः । दर्शपूर्ण मासात्मने शिरसे स्वाहा । चातुर्-मास्यात्मने शिखायै वषट् । निरूढ पशुबन्धात्मने कवचाय हुम् । ज्योतिष्टोमात्मने नेत्रत्रयाय वौषट् । सर्वक्रत्वात्मने अस्त्राय फट् । भूर्भुवस्सुवरोमिति दिग्बन्धः ॥

**ध्यानं**

आपाताल-नभःस्थलान्त-भुवन-ब्रह्माण्ड-माविस्फुरत्-
ज्योतिः स्फाटिक-लिङ्ग-मौलि-विलसत्पूर्णेन्दु-वान्तामृतैः ।

अस्तोकाप्लुत-मेक-मीश-मनिशं रुद्रानु-वाकाञ्जपन्
ध्याये-दीप्सित-सिद्धये ध्रुवपदं विप्रोऽभिषिञ्चे-च्चिवम् ॥

ब्रह्माण्ड व्याप्तदेहा भसितहिमरुचा भासमाना भुजङ्गैः
कण्ठे कालाः कपर्दाकलित-शशिकला-श्चण्ड कोदण्डहस्ताः ।
त्र्यक्षा रुद्राक्षमालाः प्रकटितविभवाः शाम्भवा मूर्तिभेदाः
रुद्राः श्रीरुद्रसूक्त-प्रकटितविभवा नः प्रयच्छन्तु सौख्यम् ॥

ॐ गणानां॓ त्वा गणपतिगं हवामहे कविं कवीनामुपमश्रवस्तमम् ।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिस्सीद सादनम् ॥
महागणपतये नमः ॥

शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च
मे भद्रं च मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे
यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे
संविच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च म ऋतं
च मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं
च मेऽनमित्रं च मेऽभयं च मे सुगं च मे शयनं च मे सूषा च मे
सुदिनं च मे ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

Web Url: http://www.vignanam.org/veda/sri-rudram-laghunyasam-devanagari.html